श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ त्रिषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रिषष्टितमः सर्गः ॥

## कुम्भकर्णस्य रावणं प्रति तत्कुकृत्यनिमित्तक उपालम्भस्तं सान्त्वयित्वा स्वकीययुद्धविषयकोत्साहस्य तेन प्रकटनं च

तस्य राक्षसराजस्य निशम्य परिदेवितम्।
कुम्भकर्णो बभाषेदं वचनं प्रजहास च ॥ **6.63.1** ॥

दृष्टो दोषो हि योऽस्माभिः पुरा मन्त्रविनिर्णये।
हितेष्वनभियुक्तेन सोऽयमासादितस्त्वया ॥ **6.63.2** ॥

शीघ्रं खल्वभ्युपेतं त्वां फलं पापस्य कर्मणः।
निरयेष्वेव पतनं यथा दुष्कृतकर्मणः ॥ **6.63.3** ॥

प्रथमं वै महाराज कृत्यमेतदचिन्तितम्।
केवलं वीर्यदर्पेण नानुबन्धो विचारितः ॥ **6.63.4** ॥

यः पश्चात्पूर्वकार्याणि कुर्यादैश्वर्यमास्थितः।
पूर्वं चोत्तरकार्याणि न स वेद नयानयौ ॥ **6.63.5** ॥

देशकालविहीनानि कर्माणि विपरीतवत्।
क्रियमाणानि दुष्यन्ति हवींष्यप्रयतेष्विव ॥ **6.63.6** ॥

त्रयाणां पञ्चधा योगं कर्मणां यः प्रपद्यते।
सचिवैः समयं कृत्वा स सम्यग् वर्तते पथि ॥ **6.63.7** ॥

यथागमं च यो राजा समयं च चिकीर्षति।
बुध्यते सचिवैर्बुद्ध्या सुहृदश्चानुपश्यति॥ **6.63.8**॥

धर्ममर्थं हि कामं वा सर्वान् वा रक्षसां पते।
भजेत पुरुषः काले त्रीणि द्वन्द्वानि वा पुनः॥ **6.63.9**॥

त्रिषु चैतेषु यच्छ्रेष्ठं श्रुत्वा तन्नावबुध्यते।
राजा वा राजमात्रो वा व्यर्थं तस्य बहुश्रुतम्॥ **6.63.10**॥

उपप्रदानं सान्त्वं च भेदं काले च विक्रमम्।
योगं च रक्षसां श्रेष्ठ तावुभौ च नयानयौ॥ **6.63.11**॥

काले धर्मार्थकामान् यः सम्मन्त्र्य सचिवैः सह।
निषेवेतात्मवान् लोके न स व्यसनमाप्नुयात्॥ **6.63.12**॥

हितानुबन्धमालोक्य कुर्यात् कार्यमिहात्मनः।
राजा सहार्थतत्त्वज्ञैः सचिवैर्बुद्धिजीविभिः॥ **6.63.13**॥

अनभिज्ञाय शास्त्रार्थान् पुरुषाः पशुबुद्धयः।
प्रागल्भ्याद् वक्तुमिच्छन्ति मन्त्रिष्वभ्यन्तरीकृताः॥ **6.63.14**॥

अशास्त्रविदुषां तेषां कार्यं नाभिहितं वचः।
अर्थशास्त्रानभिज्ञानां विपुलां श्रियमिच्छताम्॥ **6.63.15**॥

अहितं च हिताकारं धार्ष्ट्याज्जल्पन्ति ये नराः।
अवश्यं मन्त्रबाह्यास्ते कर्तव्याः कृत्यदूषकाः॥ **6.63.16**॥

विनाशयन्तो भर्तारं सहिताः शत्रुभिर्बुधैः।
विपरीतानि कृत्यानि कारयन्तीह मन्त्रिणः॥ **6.63.17**॥

तान् भर्ता मित्रसङ्काशानमित्रान् मन्त्रनिर्णये।
व्यवहारेण जानीयात् सचिवानुपसंहितान्॥ **6.63.18**॥

चपलस्येह कृत्यानि सहसानुप्रधावतः।
छिद्रमन्ये प्रपद्यन्ते क्रौञ्चस्य खमिव द्विजाः॥ **6.63.19**॥

यो हि शत्रुमवज्ञाय आत्मानं नाभिरक्षति।
अवाप्नोति हि सोऽनर्थान् स्थानाच्च व्यवरोप्यते॥ **6.63.20**॥

यदुक्तमिह ते पूर्वं प्रियया मेऽनुजेन च।
तदेव नो हितं वाक्यं यथेच्छसि तथा कुरु॥ **6.63.21**॥

तत् तु श्रुत्वा दशग्रीवः कुम्भकर्णस्य भाषितम्।
भ्रुकुटिं चैव सञ्चक्रे क्रुद्धश्चैनमभाषत॥ **6.63.22**॥

मान्यो गुरुरिवाचार्यः किं मां त्वमनुशाससे।
किमेवं वाक्श्रमं कृत्वा यद् युक्तं तद् विधीयताम्॥ **6.63.23**॥

विभ्रमाच्चित्तमोहाद् वा बलवीर्याश्रयेण वा।
नाभिपन्नमिदानीं यद् व्यर्था तस्य पुनः कथा॥ **6.63.24**॥

अस्मिन् काले तु यद् युक्तं तदिदानीं विचिन्त्यताम्।
गतं तु नानुशोचन्ति गतं तु गतमेव हि॥ **6.63.25**॥

ममापनयजं दोषं विक्रमेण समीकुरु।
यदि खल्वस्ति मे स्नेहो विक्रमं वाधिगच्छसि॥ **6.63.26**॥

यदि कार्यं ममैतत्ते हृदि कार्यतमं मतम्।
स सुहृद् यो विपन्नार्थं दीनमभ्युपपद्यते॥ **6.63.27**॥

स बन्धुर्योऽपनीतेषु साहाय्यायोपकल्पते।
तमथैवं ब्रुवाणं स वचनं धीरदारुणम्॥ **6.63.28**॥

रुष्टोऽयमिति विज्ञाय शनैः श्लक्ष्णमुवाच ह।
अतीव हि समालक्ष्य भ्रातरं क्षुभितेन्द्रियम्॥ **6.63.29**॥

कुम्भकर्णः शनैर्वाक्यं बभाषे परिसान्त्वयन्।
शृणु राजन्नवहितो मम वाक्यमरिन्दम॥ **6.63.30** ॥

अलं राक्षसराजेन्द्र सन्तापमुपपद्य ते।
रोषं च सम्परित्यज्य स्वस्थो भवितुमर्हसि॥ **6.63.31** ॥

नैतन्मनसि कर्तव्यं मयि जीवति पार्थिव।
तमहं नाशयिष्यामि यत् कृते परितप्यते॥ **6.63.32** ॥

अवश्यं तु हितं वाच्यं सर्वावस्थं मया तव।
बन्धुभावादभिहितं भ्रातृस्नेहाच्च पार्थिव॥ **6.63.33** ॥

सदृशं यच्च कालेऽस्मिन् कर्तुं स्नेहेन बन्धुना।
शत्रूणां कदनं पश्य क्रियमाणं मया रणे॥ **6.63.34** ॥

अद्य पश्य महाबाहो मया समरमूर्धनि।
हते रामे सह भ्रात्रा द्रवन्तीं हरिवाहिनीम्॥ **6.63.35** ॥

अद्य रामस्य तद् दृष्ट्वा मयाऽऽनीतं रणाच्छिरः।
सुखी भव महाबाहो सीता भवतु दुःखिता॥ **6.63.36** ॥

अद्य रामस्य पश्यन्तु निधनं सुमहत् प्रियम्।
लङ्कायां राक्षसाः सर्वे ये ते निहतबान्धवाः॥ **6.63.37** ॥

अद्य शोकपरीतानां स्वबन्धुवधशोचिनाम्।
शत्रोर्युधि विनाशेन करोम्यश्रुप्रमार्जनम्॥ **6.63.38** ॥

अद्य पर्वतसङ्काशं ससूर्यमिव तोयदम्।
विकीर्णं पश्य समरे सुग्रीवं प्लवगेश्वरम्॥ **6.63.39** ॥

कथं च राक्षसैरेभिर्मया च परिसान्त्वितः।
जिघांसुभिर्दाशरथिं व्यथसे त्वं सदानघ॥ **6.63.40** ॥

मां निहत्य किल त्वां हि निहनिष्यति राघवः।
नाहमात्मनि सन्तापं गच्छेयं राक्षसाधिप ॥ **6.63.41** ॥

कामं त्विदानीमपि मां व्यादिश त्वं परन्तप।
न परः प्रेक्षणीयस्ते युद्धायातुलविक्रम ॥ **6.63.42** ॥

अहमुत्सादयिष्यामि शत्रूंस्तव महाबलान्।
यदि शक्रो यदि यमो यदि पावकमारुतौ ॥ **6.63.43** ॥

तानहं योधयिष्यामि कुबेरवरुणावपि।
गिरिमात्रशरीरस्य शितशूलधरस्य मे ॥ **6.63.44** ॥

नर्दतस्तीक्ष्णदंष्ट्रस्य बिभीयाद् वै पुरन्दरः।
अथ वा त्यक्तशस्त्रस्य मृद्नतस्तरसा रिपून् ॥ **6.63.45** ॥

न मे प्रतिमुखः कश्चित् स्थातुं शक्तो जिजीविषुः।
नैव शक्त्या न गदया नासिना निशितैः शरैः ॥ **6.63.46** ॥

हस्ताभ्यामेव संरभ्य हनिष्यामि सवज्रिणम्।
यदि मे मुष्टिवेगं स राघवोऽद्य सहिष्यति ॥ **6.63.47** ॥

ततः पास्यन्ति बाणौघा रुधिरं राघवस्य मे।
चिन्तया तप्यसे राजन् किमर्थं मयि तिष्ठति ॥ **6.63.48** ॥

सोऽहं शत्रुविनाशाय तव निर्यातुमुद्यतः।
मुञ्च रामाद् भयं घोरं निहनिष्यामि संयुगे ॥ **6.63.49** ॥

राघवं लक्ष्मणं चैव सुग्रीवं च महाबलम्।
हनूमन्तं च रक्षोघ्नं येन लङ्का प्रदीपिता ॥ **6.63.50** ॥

हरींश्च भक्षयिष्यामि संयुगे समुपस्थिते।
असाधारणमिच्छामि तव दातुं महद् यशः ॥ **6.63.51** ॥

यदि चेन्द्राद् भयं राजन् यदि चापि स्वयम्भुवः।
ततोऽहं नाशयिष्यामि नैशं तम इवांशुमान्॥ **6.63.52**॥

अपि देवाः शयिष्यन्ते मयि क्रुद्धे महीतले।
यमं च शमयिष्यामि भक्षयिष्यामि पावकम्॥ **6.63.53**॥

आदित्यं पातयिष्यामि सनक्षत्रं महीतले।
शतक्रतुं वधिष्यामि पास्यामि वरुणालयम्॥ **6.63.54**॥

पर्वतांश्चूर्णयिष्यामि दारयिष्यामि मेदिनीम्।
दीर्घकालं प्रसुप्तस्य कुम्भकर्णस्य विक्रमम्॥ **6.63.55**॥

अद्य पश्यन्तु भूतानि भक्ष्यमाणानि सर्वशः।
न त्विदं त्रिदिवं सर्वमाहारो मम पूर्यते॥ **6.63.56**॥

वधेन ते दाशरथेः सुखार्हं
सुखं समाहर्तुमहं व्रजामि।
निहत्य रामं सह लक्ष्मणेन
खादामि सर्वान् हरियूथमुख्यान्॥ **6.63.57**॥

रमस्व राजन् पिब चाद्य वारुणीं
कुरुष्व कृत्यानि विनीयतां ज्वरः।
मयाद्य रामे गमिते यमक्षयं
चिराय सीता वशगा भविष्यति॥ **6.63.58**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिषष्टितमः सर्गः॥